# संस्कृतवाङ्मये महाकवेर्माघस्य काव्ये प्राकृतिकवैभवम्

**डॉ. सीता राम शर्मा**
**प्रोफेसर (साहित्य), राजकीय धुलेश्वर आचार्य, (पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)**

**Article Info**
Volume 4, Issue 5
Page Number : 63-66
**Publication Issue :**
September-October-2021
**Article History**
Accepted : 01 Sep 2021
Published : 09 Sep 2021

**शोधसारांशः-** महाकविमाघेन वनोपवन-वृक्ष - लता - पर्वत-सन्ध्या-सागर-सरित् - सरोवर - नगर - प्रभातादि - प्राकृतिक-रूपकाणामतीव मनोहरं हृदयस्पर्शिनं वर्णनं विहितमस्ति । विविधैः काव्यशास्त्रीयलक्षणैः महाकवेः प्रकृतिवर्णनम् अनेकशः परिमण्डितमस्ति । माघस्य प्रकृतिवर्णनं भावाभिव्यञ्जनात्मकमस्ति । महाकविना कस्यापि विषयस्य वर्णनं तस्य अन्तस्तले प्रविश्य सूक्ष्मनिरीक्षणेन कृतमस्ति। प्रकृतेः सूक्ष्मनिरीक्षणे महाकवेः दूरदर्शिता आसीत् । अतिगहनविषयाणां वर्णनमपि कविना एतादृशसारल्येन कृतम् यत् विषयः दर्पणवत् स्पष्टं प्रतीयते ।

**मुख्यशब्दाः-** वनोपवन,वृक्ष, लता, पर्वत,सन्ध्या, सागर-सरित् , सरोवर, नगर, माघः प्रकृतिवर्णनम्।

**उपमा कालिदासस्य भारवेरर्थगौरवम् ।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥**[1]

इत्यस्मिन् प्रसिद्धे श्लोके महाकवेः योग्यताया विषये उच्यते यत् महाकविमाघः संस्कृतवाङ्मये सर्वाधिकं भासुरं रत्नमस्ति । कविरयं लोकविश्रुतां कीर्तिं भजते । अस्य रचनाकालविषये कश्चिद् विवादोऽस्ति तथापि अधिकतया एतेनैव महाकवेः नैपुण्यं ज्ञायते यत 'शिशुपालवधम्' एकैवाऽस्य कृतिरस्ति । तस्य नाम वृहत्त्रय्यां गण्यते। माघस्य विद्वत्त्वं, पाण्डित्यं काव्यवैशिष्ट्यञ्च दृष्ट्वा समालोचकैः कथितम् 'काव्येषु माघ : ' । इतोऽपि विशालशब्दकोषं वीक्ष्य एतदपि उद्घोषितं यत् 'मेघे माघे गतं वयः।' एतादृशस्य महाविभूतेः वर्णनं स्वल्पीयेषु शब्देषु करणम् अतीव कष्टकरमस्ति। तथापि संस्कृतवाङ्मयस्य गौरवं धारयतः महाकविमाघस्य काव्ये मया प्रकृतिवर्णनोपरि दृष्टिपातस्य प्रयासः कृतः । महाकविमाघेन वनोपवन-वृक्ष - लता - पर्वत-सन्ध्या-सागर-सरित् - सरोवर - नगर - प्रभातादि - प्राकृतिक-रूपकाणामतीव मनोहरं हृदयस्पर्शिनं वर्णनं विहितमस्ति । विविधैः काव्यशास्त्रीयलक्षणैः महाकवेः प्रकृतिवर्णनम् अनेकशः परिमण्डितमस्ति । माघस्य प्रकृतिवर्णनं भावाभिव्यञ्जनात्मकमस्ति ।

महाकविना कस्यापि विषयस्य वर्णनं तस्य अन्तस्तले प्रविश्य सूक्ष्मनिरीक्षणेन कृतमस्ति। प्रकृतेः सूक्ष्मनिरीक्षणे महाकवेः दूरदर्शिता आसीत् । अतिगहनविषयाणां वर्णनमपि कविना एतादृशसारल्येन कृतम् यत् विषयः दर्पणवत् स्पष्टं प्रतीयते । शिशुपालवधे कदाचिदेव एतादृशं पद्यं स्यात् यत्रालङ्कारत्वं न स्यात् । अलङ्काराणां प्राचुर्यत्वादपि कस्मिन्नपि पद्ये अलङ्काराणां बलाद्रोपणं न दृश्यते ।

**द्वारिकापुर्याः वर्णनम्** - युद्धविचारस्य स्थगिते सति सौम्यमूर्तिः श्रीकृष्णः आकाशसदृशोन्नतोन्नत- पताकान् धारयन्तीं चतुरङ्गिणीसेनामाधृत्य गच्छन्नासीत् तदा ता द्रष्टुम् नागरिकाणां विशालसमूहः अग्रे अग्रे वीथिषु पूर्वमेव गत्वा तस्थौ बभूव । तस्मिन् क्षणे सुवर्णस्य कान्तिद्वारा दिशान् पिङ्गलवर्णी कुर्वन्तीं द्वारिकापुरीं दृष्ट्वा तस्योपमा वडवाग्नि इति रूपेण दत्ता महाकविना-

**मध्ये समुद्रं ककुभं पिशङ्गीर्या कुर्वती काञ्चनभूमिसा ।**
**तुरङ्गकान्तामुखहव्यवाहज्वालेव भित्त्वा जलमुल्ललास ॥'**

इतः एकत्रिंशच्छलोकैर्द्वारिकां वर्णयति कविः । अस्मिन् श्लोके द्वारिकापुरीं ब्रह्मणा अनल्पप्रयासेन प्राप्त - शिल्प - विज्ञान - सम्पत्तेः विस्तारस्य सीमारूपं वर्णितं यत् 'आदर्श' इत्युक्ते दर्पणवत्स्पष्टे-निर्मले जलधिजले स्वर्गच्छाया समानं कथितम्-

**त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसम्पत्प्रसरस्य सीमा ।**
**अदृश्यतादर्शतलामलेषु च्छायेव या स्वर्जलधेजलेषु । '**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

समुद्रतः श्रीकृष्णं दृष्ट्वा स्वगर्भे लीनां रत्नपक्तिं तथोपस्थापयति तथा नवजातशिशुं दृष्ट्वा पिता मुहुः प्रेम्णा तस्यै रत्नावलीं बध्नाति -

**रथाङ्गभर्त्रेऽभिनवं वराय तस्याः पितेव प्रतिपादितायाः ।**

**प्रेम्णोपकण्ठं मुहुरङ्गभाजो रत्नावलीरम्बुधिराबबन्ध ॥**

इतोऽपि एकत्र द्वारिकापुरी नक्षत्राच्छादितसुमेरूपर्वत इव प्रतिभातीति कथितम्। कुत्रचित् 'रत्नराशिमाला' शब्देन कथिता।

नगरवर्णने कविना भवनानां तत्रत्यस्त्रीणां तासां लावण्यस्य, सज्जनानां स्वभावस्य वर्णनं कृतम्। श्रीकृष्णः द्वारिकापुर्याः शोभां तथा वर्धयति तथा गौरादिवर्णाः लावण्यादिगुणाङ्गनायाः शोभां वर्णयन्ति-

**स्निग्धाञ्जनश्यामरुचिः सुवृत्तो**

**वध्वा इवाध्वंसितवर्णकान्तेः ।**

**विशेषको वा विशिशेष यस्याः**

**श्रियं त्रिलोकीतिलकः स एव ॥**

**समुद्रवर्णनम्** माघे सुरूचिपूर्णाः शतश उपमाः उपलभ्यन्ते । तत्र क्वचित् शास्त्रीयज्ञानम्, क्वचित् काव्यगौरवम्, क्वचित् नीतिशास्त्रत्वम् क्वचिच्च विविध- विद्याविशारदत्वं तस्य गरिमाणं प्रकटयति। जलधेः यत्र फेनायमानं रूपं दृश्यते। तत्र उपमाया वैचित्र्यमपि दृश्यते-

**आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम्।**

**फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥**

अत्र समुद्रे यत् फेनं दृश्यते तस्योपमा कविना अपस्मार अर्थात् 'मिर्गी' इति रोगेण सह स्वाभावस्य उत्कृष्टतां द्योतयन्त्युपमा दत्ता। यथा मुनीश्वरैः स्वीकृत्य रचिताः प्रविशन्ति तथैव मेघाः समुद्रात् जलं स्वीकृत्य वृष्टिं कृत्वा नदीं निर्मान्ति तथा पुनः ताः नद्य समुद्रे एव प्रविशन्ति-

**उद्धृत्य मेघैस्तत एवं तोयमर्थं मुनीन्द्रैरिव सम्प्रणीताः ।**

**आलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिम् ॥**

ऋतुवर्णनम् - ऋतोः वर्णनप्रस माघेन बहु - सरस - सूक्ष्मवर्णनं कृतम्। यथा-

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।**

**मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोहरैः ॥**[2]

अस्मिन् श्लोके वसन्तारम्भस्य सुललितं दृश्यविधानं सहृदयहृदयावर्जकं वर्तते। मेघानां गर्जनं श्रुत्वा मयूराणां नर्तनं वर्षाकाले सुप्रसिद्धमेवास्ति। अस्य चित्रणं महाकविमाघस्य काव्ये सौक्ष्म्येण कृतमस्ति -

**जलपक्तिरनर्तयदुन्मदं कलविलापि कलापिकदम्बकम् ।**

**कृतसमार्जनमर्दलमण्डलध्वनिजया निजया स्वनसम्पदा ॥**

**शिशिरवर्णने -** शीताधिक्यं, शरद्ग्रीष्महेमन्तकालस्यापि प्राकृतिकपरिवेशस्य वर्णने प्रकृतेः स्वभावचित्रणं विहितमस्ति । ऋतूनां वर्णनेऽपि तेषाम् एतादृशी सहजा गतिरासीत् । यदारम्भतः एकविंशति श्लोकपर्यन्तं बसन्तर्तोः, द्वाविंशतितः चतुर्विंशतिपर्यन्तं ग्रीष्मतः, पञ्चविंशतितः चत्वारिंशच्छलोकपर्यन्तं वर्षर्तोः, एकचत्वारिंशतः चतुश्पञ्चाशत्पर्यन्तं शरदृतोः, पञ्चपञ्चाशतः एकषष्टिपर्यन्तं हेमन्तर्तोः द्विषष्टितः षट्षष्ठीपर्यन्तं शिशिरर्तोः वर्णन कृतं तथापि तेषां मनसि सन्तुष्टिः न जाता। इतोपि सप्तषष्टितः नवसप्ततिपर्यन्तम् पुनः षण्णामृतूनां वर्णनं कविना कृतम् । एतदतिरिच्यापि बहुत्र कविना ऋतोः वर्णनं कृतमस्ति । कुत्रचित् युद्धवर्णनेऽपि ऋतोः कथनमागच्छति । कुत्रचित् मार्गवर्णनेऽपि ऋतोवर्णनं कथितं कविना।

चन्द्रवर्णनम् -' माघे सन्ति त्रयो गुणाः ' एषा उक्तिः नवमसर्गे यथार्थतां भजते। अस्मिन् सर्गे चन्द्रोदयवर्णनावसरे यादृशी शब्दयोजना, यादृशं माधुर्यम् आकर्षणञ्च उपस्थापितमस्ति, तेन माघस्य सर्वोत्कृष्टं वैशिष्ट्यं सुस्पष्टं प्रतिभाति।

**अथ लक्ष्मणानुगतकान्तवपुर्जलधिं विलङ्घ्य शशिदाशरथिः ।**

**परिवारितः परित ऋक्षगणैस्तिमिरोघराक्षसकुलं बिभिदेः ॥'**

अत्र मानवगुणोपेतस्य चन्द्रस्य रामरूपेण वर्णनम् अद्वितीयं प्रतिभाति । प्रकृतिवर्णनमाध्यमेन तात्कालिकसमाजव्यवस्थाया अपि निरूपणं कृतमस्ति यथा-

**उपजीवति स्म सततं दधतः परिमुग्धां वणिगिवोडुपतेः ।**

**धनवीथिवीथिमवतीर्णवतो निधिरम्भसामुपचयाय कलाः ॥**

अत्र चन्द्रस्य बणिग्रूपेण वर्णनं तात्कालिकविपणनव्यवहारं निरूपयति । प्रभातवर्णनम् - सम्पूर्णैकादशे सर्गे प्रभातवेलायाः वर्णनं कृतमस्ति । श्लेष - मूलकातिशयोक्तियुक्तरूपकस्य बहुशोभनं रूपं कविना वर्णितम्-

**उदयशिखरिशृङ्गपाङ्गणेष्वेषरिङ्गन्,**

**सकमलमुखहासं वीक्षितः पद्मनिभिः ।**

**विततमृदुकराग्रः शब्दयन्त्या वयोभिः**

**परिपतति दिवाऽङ्के हेलया बालसूर्यः ॥ "**

इतोऽपि सूक्ष्मरूपेण प्रकृतिः वर्णनं सम्पूर्णसर्गे कृतमस्ति । यथा-

**परिणतमदिराभः भास्करेणांशुबाणै-**

**स्तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः ।**

**रूधिरमिव वहन्त्यो भन्ति बालातपेन**

**च्छुरितमुभयरोधोवरितं वारि नद्यः ॥ '**

**सूर्योदयवर्णनम् -** माघस्य काव्ये सूर्योदयस्य प्रकृतिसौन्दर्यमपि दर्शनीयमस्ति -

**विततपृथुवरत्रातुल्यरूपैर्मयूखैः,**

**कलश इव गरीयान्दिग्भराकृष्यमाणः ।**

**कृतचयविहङ्गालाप- कोलाहलाभिर्जल-**

**निधिजलमध्यादेष उत्तार्यतेऽर्कः ॥**

अत्र सूर्यः पृथु लताग्रकलशः दिग्वधूभिः सहमयूखरज्जुभिः समाकृष्ण समुद्रजलाद् उद्ध्रियते। तस्मिन् क्षणे विहङ्गमानां कलरव इव तासां कोलाहलः प्रतीयते । यद्यपि चित्रणं इदं मानवीकरणरूपं वर्तते, परन्तु कविनाऽत्र विलासभावानां प्रामुख्येन समावेशो विहितः ।

**सूर्यास्तवर्णनम् -** अर्थान्तरन्यासमधिकृत्य सज्जनानां स्थानं विपत्तिसमयेऽपि उच्चैरेव भवतीति भावमाश्रित्य सूर्यास्तस्य वर्णनं कृतम् ।

**उपसंध्यमास्त तनु सानुमतः शिखरेषु तत्क्षणमशीतरूचः ।**

**करजालमस्तसमयेऽपि सतामुचितं खलूच्चरमेव पदम् ।**

**पर्वतवर्णनम्-** चतुर्थसर्गे महाकविना रैवतकपर्वतस्य वर्णने रैवतकपर्वताय इन्द्र- ब्रह्मा- शिव- रूद्र- विन्ध्यपर्वनाम् उपमा दत्ताऽस्ति।

**उदयति विततोर्ध्वरश्मिरज्जावविहम-**

**रूचौ हिमधाग्नि याति चास्तम् ।**

**वहति गिरिरयं विलम्बिघण्टाद्वय-**

**परिवारिवारणेन्द्रलीलाम्॥**[3]

अस्य श्लोकस्य वैशिष्ट्यं दृष्ट्वैव महाकविः 'घण्टामाघः' इत्युपाधिना अलङ्कृतः। इतोऽपि विशिष्टोपमा दत्ता । अन्यस्मिन् श्लोके कविना यत्-

**व्योमस्पृशः प्रथयता कलधौतभित्ति-**

**रून्निद्रपुष्पचणचम्पकपिङ्गभासः ।**

**सौमेरवीमधिगतेन नितम्बशोभामेतेन**

**भारतमिलावृतवद्विभाति ॥** [4]

अस्मिन् श्लोके कविना कथितं यत् यथा देवभूमिविशेष इलावृतः पर्वतेन शोभते तथैव अस्माकं भारतदेशोऽपि रैवतकं प्राप्य तथाकथितां शोभामेव प्राप्नोति। अस्मिन् काव्ये पर्वते भ्रमणं कुर्वन्तः पशवोपि विशिष्टशोभां विशिष्टोपमाञ्च प्राप्तवन्तः। उपवनवर्णनम्-उपवनवर्णते कविना 'उन्नतानां महतामनुगमने पश्चाद्धावने, अनुवृत्तौ च सम्पदो अग्रतः स्था। ' इत्युक्तिमुक्त्वा सामान्यतः विशेषं प्रतीतित्यवधणा- मनुसरन् उपवनस्य शोभावर्णिता-

**उपवनपवनानुपातदक्षैरलिभिरलाभि यदङ्गनाजनस्य।**
**परिमलविषयस्तदुन्नतानामनुगमने खलु सम्पदोऽग्रतस्था।।**[5]

एवं महाकविर्माघः संस्कृतसाहित्यस्य विशेषतः महाकाव्यजगतः मध्यमणिः। अतः महाकविरियं वन्दनीयोऽभिनन्दनीयश्च सर्वदा।

**सन्दर्भग्रन्थः**


1. संस्कृतसाहित्य का समीक्षात्मक इतिहास डा। कपिल द्विवेदी पृष्ठ-212
2. सिंस्कृतसाहित्य का समीक्षात्मक इतिहास डा। कपिल द्विवेदी पृष्ठ-211, 6/2
3. शिशुपालवधम्-4/20
4. संस्कृतसाहित्य का इतिहास-डॉ बलदेव उपाध्याय पृष्ठ-203
5. शिशुपालवधम्-4/228